International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 234-236
© 2017 IJSR
www.anantaajournal.com
Received: 19-09-2017
Accepted: 21-10-2017

**S Sitarama Rao**
Assistant Professor,
Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

**Correspondence**
**S Sitarama Rao**
Assistant Professor,
Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

# ब्रह्मर्षियाज्ञवल्क्यस्यजीवनचरितम्

## S Sitarama Rao

## प्रस्तावना

वेदान्तवेद्यं सकलागमज्ञं दयासुधासिन्धुमनन्तरूपम् ।
श्रीयाज्ञवल्क्यं परिपूर्णचन्द्रं श्रीमद्गुरुं नित्यमहं नमामि॥

**योगीश्वराणां श्रीयाज्ञवल्क्यनां जननवृत्तान्तं चिन्तयति चेत् एवं स्पष्टं भवति । यथा–**

आसीत् पुरा देवरातो मुनिर्वाजसनिद्विजाः।
सोऽपत्यकामे केदारे समारेभे महत्तपाः।।
द्वादशाब्दान्तमे मासि प्रत्यक्षोऽभूत् सदाशिवः।
वरं वरय सिद्धोऽसि यत्तेऽभीष्टो द्विजोत्तम।
त्वत्पुत्रतां गतोऽहं वै याज्ञवल्क्य इति श्रुतः।। [1]

देवरातिसुनन्दा इति नाम्नोः दम्पत्योः पुत्रः याज्ञवल्क्यमहर्षिः इति चरित्रकथनद्वारा स्पष्टं भवति । देवरातः यज्ञ-यागादीन् अनेकान् अकरोत् । अतः लोके याज्ञवल्क्यः इति अपरं नाम प्रसिद्धं भवति । तथा च अस्य यज्ञवल्क्यस्य अपत्यं पुमान् याज्ञवल्क्यः इति याज्ञवल्क्यस्य सुप्रसिद्धं नाम भवति । स्कान्दपुराणे इति वृत्तं एवं भवति । यथा –

अयातयामवेदेन जनान् सम्बोधितः सुधीः।
वायुर्वै याज्ञवल्क्येति देवरातगृहे गुरुः।।
कार्तिके शुक्लपक्षे च दशम्यामिन्दुवासरे।
जातश्चन्द्रे च हर्वृक्षे ववृधे सूर्यसन्निभाः॥ [2]

**आदित्यपुराणेऽपि**

विष्णोर्वीर्यप्रवृद्धे स्वयमपि भगवन् भारतीशःसमीरः।[3]

कार्तिक्यां शुक्लपक्षे हरिभ दशतिथौ याज्ञवल्क्येति जज्ञे।।
इन्दोर्वारे सुनन्दः मघवनुतगयं देवरातस्य पत्नी।
साक्षाच्छुक्लस्य देवः सत्रऋषितपि यथलौल्यपाद्वाजप ेय े॥

स्कान्दपुराणान्तर्गतवृत्तान्तस्य आदित्यपुराणान्तर्गतभृगुकर्दम-संवादस्य च पर्यालोचनेन देवरात–सुनन्दादम्पत्योः कार्तिकशुद्धदशम्यां इन्दुवासरे याज्ञवल्क्यस्य जननं भवतीति स्पष्टतया अवगम्यते ।

विष्णुपुराणं परिशीलयामःचेत्संक्षेपेण याज्ञवल्क्यस्य जीवनगतिः इत्थं भवति । याज्ञवल्क्यस्य अष्टमेवर्षे उपनयनं अभूत् । ततः पित्राज्ञया षडङ्गसहितऋग्यजुःसामाथर्ववेदान् क्रमेण बाष्कल-वैशंपायन-जौमिनि-उद्दालकाचार्याणां सन्निधौ अधीतवान् । एकस्मिन्दिने तद्देशस्य प्रसूत इति नाम राजा महाव्याधेन पीडितवान् । सः राजा विविध औषधसेवनेनाऽपि रोगस्य उपशमनं न भवति । अतः स राजा तद्देशस्य आस्थानं पुरोहितं वैशंपायनमहर्षिं आश्रितवान् । तदा सः वैशंपायनः तद्रोगोपशमनाय प्रतिदिनं मन्त्रपुतोदकं प्रेषयामि इति उक्तवान् । तत्प्रभृति वैशंपायनाज्ञानुसारं षष्ठ्युत्तरशतत्रयशिष्याः मन्त्रानुष्ठानं कृत्वा प्रतिदिन ं एकैको गत्वा मन्त्रोदकं राज्ञे ददाति स्म ।

एवं राजा प्रसूतः प्रतिदिनं मन्त्रजलं स्वीकृत्याऽपि रोगोपशमनाभावान्निरुत्साहः अभवत् । एवं क्रमे याज्ञवल्क्यः स्वनियमानुसारं अभिमन्त्रितजलं स्वीकृत्य राज्ञे मन्त्रजलं दत्तवान् । सः राजा प्रसूतः तिरस्कारं कृतवान् ।

ततः याज्ञवल्क्यः तज्जलं सिंहासस्योपरि प्रोक्षणं कृतवान् । तेन प्रभावेन सिंहासनोपरि लता-गुल्मादीनि सजीवाःभूत्वा दर्शितवन्तः । तान्दृष्ट्वा राजा प्रसूतः आश्चर्यो भूत्वा स्वापराधं ज्ञात्वा वैशंपायनमहर्षिं प्रति गत्वा पुनः मन्त्रोदकैः सह याज्ञवल्क्यं प्रेषयन्विति प्रर्थितवान् । ततः वैशंपायनः याज्ञवल्क्यं प्रति पुनः मन्त्रजलं स्वीकृत्य ददातु इति गुरुणा आज्ञप्तोऽपि अवमानेन पीडितः याज्ञवल्क्यः मन्त्रजलं राजानं दातुं नाङ्गीकृतवान् ।

आम्नायं देहि मे शीघ्रं यदि तत्र न गच्छसि।
निर्गच्छ भवनादस्मान्नृशंस गुरुनन्दक ।।[4]

तेनकोपोद्रिक्तः वैशंपायनः याज्ञवल्क्यं आहूय मयि अध्ययनं कृतं सर्वं याजुषं निःशेषेण अत्र त्यक्त्वा गच्छतु इति आज्ञां कृतवान् । तदा याज्ञवल्क्यः स्वयोगप्रभावेन सर्वेभ्यः शिष्येभ्यः शक्तिं गृहीत्वा अग्निकणरूपेण वमनं कृतवान् । ततः वैशंपायनः स्वशिष्यान् तित्तिरिपक्षिवत् रूपं कृत्वा तद्वमनं भक्षयन्त्विति आदेशं दत्वा याजुषस्य रक्षणं कृतवान् । ततः याज्ञवल्क्यः भगवतः सूर्यनारायणस्य अनुग्रहेण शुक्लयजुर्वेदं अध्ययनं कृतवानिति आदित्यपुराणान्तर्गतवचनेन स्पष्टं भवति । तदुच्यते –

एवं स्तुताः स भगवान् वाजिरूपधरो हरिः।
यजूंष्ययातयामानि मनयेदाप्रसादत।। इति।[5]

एवं शुक्लयजुर्वेदाध्येता याज्ञवल्क्यः गङ्गातीरस्थस्वाश्रमेक ाण्व-माध्यन्दिन-शापेय–तापनीय–कपोल–पौण्ड्रवत्स-आवटक-परमावटिक-पाराशर-वैनधेय-ब ौधेय-औधेय गालव-बौजवाप–जाबालेभ्यःपञ्चदशशिष्येभ्यःशुक्लयजर्वेदं विस्तारं कृतवान् ।

ततः याज्ञवल्क्यः कतकुमारीं कात्यायनीं उद्वाह्य गृहस्थाश्रमं स्वीकृतवान् । तथा च कलान्तरे मैत्रेयीं इति कन्यामपि आध्यात्मिकसहधर्मचारिण ी रूपेण स्वीकृतवान् ।

एवञ्च जनकमहाराजसभायां वेदान्तविद ः जयित्वा बहुमानं स्वीकृतः याज्ञवल्क्यः। अतः ब्रह्मज्ञानसम्पन्नः, प्रज्ञाशाली इव ज्ञायते ।

तथा च साक्षात् जनकमहाराजः याज्ञवल्क्यस्य पाण्डित्यं ज्ञात्वा स्वसभायां याज्ञवल्क्यं गुरुरूपेण प्रकटणं कृत्वा वेदान्तविषयान्

अधीतवान् । तथा च कस्मिंश्चित् सन्दर्भे शाकल्यस्य च प्राणदानमपि कृतवानिति चारित्रे वर्तते ।

एवं गृहस्थाश्रमं अनतिक्रम्य अनेक यज्ञयागादिक्रतून्निर्वहणं कृत्वा कालान्तरे भार्ययोः अनुमतिं स्वीकृत्य सन्यासाश्रमं स्वीकृतवान्। सन्यासाश्रमे मैत्रेयी, गार्गी इत्यादि शिष्याणां कृते अमृतत्वं प्रसाद्य मुक्तिमार्गं उपदिष्टवान् ।

तात्विकचिन्तने शुक्लयजुर्वेदे स्थित ईशावास्यउपनिषत् अग्रस्थानं भजते। तथा च योगसिद्धान्तादिषु विविधविशेषतत्वानि, बृहदारण्यकोपनिषदा, शथपथब्राह्मणेन गालवादिउपनिषदा च प्रतिपाद्यते। अपि च ब्रह्मिष्ठः याज्ञवल्क्यः भारतीयधर्मरक्षणाय आचर– व्यवहार–प्रायश्चित्तरूपां याज्ञवल्क्यस्मृतिं अर्पितवान् ।

अस्मिन् भारतदेशे शुक्लयजर्वेदस्य पञ्चदशशाखाः प्रसिद्धाः भवन्ति । तासु पञ्चदशशाखासु काण्वशाखा दक्षिणभारते, मध्यन्दिनशाखा उत्तरभारते च अत्यन्त प्रसिद्धे भवतः, शिष्टाः लुप्ताः भवन्ति । तथा च पाञ्चरात्रागमसम्प्रदायवादिनां काण्वशाखानुसारेण स्वकर्मणां आचरन्तीति जयाख्यसंहितानुसारेण ज्ञायते । यथा –

काण्वीयशाखामधीयानौ औपगायनकौशिकौ ।
प्रपत्तिशास्त्रनिष्णातौ स्वनिष्ठानिष्ठितावुभौ ।।
तद्गोत्रसम्भवा एव कल्पान्तं पूजयन्तु माम् ।
जयाख्ये नाथ पाद्मेन तन्त्रेण सहितेन वै ।
अत्राधिकारउभयोस्तयोरेव कुलीनयोः।
शाण्डिल्यश्च भरद्वाजो मुनिर्मौञ्जायनस्तथा ।
इमौ च पञ्चगोत्रस्थाः मुख्याः काण्वीमुपाश्रिताः
श्रीपाञ्चरात्रतन्त्रीये सर्वस्मिन् शुभकर्मणि ॥[6]

काण्वीयाः, माध्यन्दिनाः सर्वे श्रीयाज्ञवल्क्यमहर्षेः तपःप्रभावेन इतोधिकाः स्वधर्मरताः भवेयुरिति अखिलाण्डकोटिब्रह्माण्डनायकं श्रीश्रीनिवासं प्रणम्य विरमामि ।

**इति शम्**

1. ब्रह्माण्डपुराणम् वेदप्रशंसा - 22-24
2. स्कान्दपुराणम् – 17,18
3. आदित्यपुराणम् – उत्तरकाण्ड – 13-152
4. श्रीयाज्ञवल्क्यचरितम् पृ 89
5. आदित्यपुराणम् उत्तरकाण्ड 13-172
6. जयाख्यसंहिता 33 अ – 66 तः 68